# Kaverya Ashtakam

# કાવેર્યષ્ટકમ્

## Document Information

Text title : kAveryaShTakam 2

File name : kAveryaShTakam2.itx

Category : aShTaka, devii, nadI, devI

Location : doc_devii

Proofread by : Prabha Maruvada

Description-comments : Kaveri Stuti Series No. 532 Thanjavur Sarasvati Mahal Series

Latest update : July 7, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 10, 2024

*sanskritdocuments.org*

# કાવેર્યષ્ટકમ્

રઙ્ગત્રયોત્સઙ્ગવિરાજમાને-
બ્રહ્માદ્રિકૂટાશ્રિતતીર્થગર્ભે ।
સમસ્તસિદ્ધાશ્રમરમ્યતીર્થે
કાવેરિ કાવેરિ મમ પ્રસીદ ॥ ૧॥

તુલાગતેઽર્કેતટિનીપરાભિ-
ગઙ્ગાદિભિસ્સેવિતપાદપદ્મે ।
ત્રિકોટિતીર્થાશ્રમપુષ્કરાઢ્યે
કાવેરિ કાવેરિ મમ પ્રસીદ ॥ ૨॥

દદાસિ કુલ્યાભિરનર્ઘધાન્યાન્
અશેષચોલીયજનસ્ય દેવિ ।
ભુક્તિપ્રદે મુક્તિવિધાનદક્ષે-
કાવેરિ કાવેરિ મમ પ્રસીદ ॥ ૩॥

નિજાભિધાનશ્રવણાહતાનાં-
નિસ્શેષપાપક્ષયકારિણી ત્વમ્ ।
નિદાઘતૃષ્ણાદિ નિરાસદક્ષે-
કાવેરિ કાવેરિ મમ પ્રસીદ ॥ ૪॥

પરાશરાગસ્ત્યવસિષ્ઠમુખ્યૈ -
મહર્ષિભિર્માન્યતપોભિરમ્બ ।
ત્વમાશ્રિતા કર્મઠસિદ્ધિહેતુઃ
કાવેરિ કાવેરિ મમ પ્રસીદ ॥ ૫॥

માયૂરમધ્યાર્જુનકુમ્ભઘોણ-
શ્રીરઙ્ગચુઞ્ચુસ્થલઘટ્ટગાત્વમ્ ।
સહ્યોદ્ભવે સિન્ધુયુતે સ્વતન્ત્રે
કાવેરિ કાવેરિ મમ પ્રસીદ ॥ ૬॥

બ્રહ્માદિભિર્દેવવરૈસ્ત્રિસન્ધ્યં
વસિષ્ઠપૂર્વૈર્મુનિભિર્વરિષ્ઠૈઃ ।
નિત્યં ગજારણ્યગતૈર્નિષેવ્યે
કાવેરિ કાવેરિ મમ પ્રસીદ ॥ ૭॥

સુવાસિનીનાં ચ નિજાશ્રિતાનાં-
પતિપ્રિયત્વં ચ સુતાદિવર્ગમ્ ।
દાસ્યસ્યુદારં બહુભોગભાગ્યં
કાવેરિ કાવેરિ મમ પ્રસીદ ॥ ૮॥

નિજપ્રવાહાપ્લવલબ્ધપુણ્ય-
પ્રસિદ્ધસત્કર્મફલોદયેન ।
નૃણામભીષ્ટાર્થવિધાયિની ત્વં
કાવેરિ કાવેરિ મમ પ્રસીદ ॥ ૯॥

ઇતિ કાવેર્યષ્ટકં સમ્પૂર્ણમ્ ।

Proofread by Prabha Maruvada

*Kaverya Ashtakam*

pdf was typeset on July 10, 2024

Please send corrections to *sanskrit@cheerful.com*